॥ श्री ॥
अथ श्री त्रिविक्रमपंडिताचार्यसुत श्री नारायणपंडिताचार्यविरचितः
॥ श्री मध्वविजयः ॥

११. ऐकादशः सर्गः
प्रचुरांतरप्रवचनं फणिराड् उपशुश्रुवान् ससनकादिमुनिः ।
गगनेऽल्पदृष्टवपुरत्र जनैः त्वरितं निलीनरुचिराप पदम् ॥ ११.१ ॥

अतिचित्रधाम्नि निजधाम्नि रतं ससहस्रमस्तकमनंतममुम् ।
मुनयोऽभिवाद्य विनयाभरणाः वरमन्वयुंजत तदाऽर्थमिमम् ॥ ११.२ ॥

भगवत्तमस्य विपुलप्रमतेः समयं मनोहरतमं जगति ।
महितं भवद्भिरपि लोकपते पठतां मुहुः फलमुदेष्यति किम् ॥ ११.३ ॥

अधिकारिणां फलमलं विदुषां भवति प्रवृत्तिरतिवीर्यवती ।
इति तत्फलं सफलसंकथनो भगवान् प्रपंचयतु भूरिदयः ॥ ११.४ ॥

इति तैरुदीरितमुदारमतिः वचनं निशम्य स जगाद गिरम् ।
शृणुताऽदरेण महनीयतमं महनीयपादसमयस्य फलम् ॥ ११.५ ॥

त्रिदिवादि लभ्यमपि नास्य फलं कथितं कृषेरिव पलालकुलम् ।
स्वफलं तु मुक्तिपदमुक्तिपदं शुकशारदादिपरमार्थविदाम् ॥ ११.६ ॥

परमागमार्थवरशास्त्रमिदं भजताममानवकलारचितम् ।
व्रजतामहो परमवैष्णवतां रतये स्वलोकमजितो दिशति ॥ ११.७ ॥

ननु तत्र विश्वविभवैकपदं प्रतिभाति पूर्णपुरुषस्य पुरी ।
उपलभ्यते यदुपमानपदं प्रतिबिंबमेव मणिवप्रगतम् ॥ ११.८ ॥

सितसौधसंततिरुचा स्फुरिता परितोऽरुणाश्मगृहपंक्तिरुचिः ।
इह मच्छरीरवलये लसितां अनुयाति मूर्तिमसुरासु हृतः ॥ ११.९ ॥

शबळा वळीकघटितस्फटिकद्युतिभिर्हरिन्मणिमयी वळभी ।
प्रतिसद्म भाति यमुना मिळिता सितसौरसैंधवपयोभिरिव ॥ ११.१० ॥

यदि नाभविष्यदिह विभ्रमतानियमो जनस्य निलयावलिषु ।
विकटा विटंककृतपत्रितति: कृतकेत्यवैक्ष्यत कथंचन नो ॥ ११.११ ॥

विविधस्तुलोपगतचित्रपटीसुवितानलंबिमणिदामगण: ।
शरणांतरेष्वधिकपूरणत: प्रचकास्ति विभ्रम इवावगळन् ॥ ११.१२ ॥

विमलाकृति: प्रकृतिरेव महामणिहेममय्यखिलवस्तुमयी ।
इह संभवेत् सकलकांतिरस: कथितोऽधिकोक्तिभिरत: कविभि: ॥ ११.१३ ॥

तदनादिकालमितमुक्तिरतेःअगणय्यशंभुमुखसंघतते: ।
नगरैर्महापुरमसंहतिमत् लसति प्रभोरयमहो महिमा ॥ ११.१४ ॥

भवनं विभाति भुवनैकपतेःभुवनत्रयाद्भुतगुणातिशयी ।
वरमंदिरप्रकरमध्यगतं द्विजमंडलस्थशशिमंडलवत् ॥ ११.१५ ॥

स्वयमिंदिरैव पतिमानकरी गृहकर्म यत्र कुरुते सुतराम् ।
अपि किंकरीदशशतीमहिता श्रियमत्र वर्णयति वेश्मनि क: ॥ ११.१६ ॥

कमलापति: कमलयाऽमलया कमनीयया कमललोचनया ।
अमृताहिराजमृदुभोगगत: स्वरतोऽपि तत्र रमते परम: ॥ ११.१७ ॥

तरुणप्रभाकरसहस्ररुचं कनकांबरं मणिमयाभरणम् ।
हसिताननेंदुमरविंददृशं तमरींद्रधारिणमनुस्मरत ॥ ११.१८ ॥

गणयेद् रमाऽस्य न गुणानखिलान् चतुराननश्चतुरवागपि नो ।
न वयं सहस्रवदना अपि तान् अपरोदितानतिवदेम पुन: ॥ ११.१९ ॥

विधयो विहंगपतयोऽगणिता रमणीयुताश्च फणिपेंद्रमुखाः ।
परयोगभूरिसुखभोगमिता अवलोक्य तं दधति मोदरसम् ॥ ११.२० ॥

सचतुर्भुजा वनजपत्रदृशो वरवेषिणोऽत्र सपिशंगपटाः ।
अरुणप्रभाश्च तरुणाभ्ररुचो विचरंति नाथरुचयः पुरुषाः ॥ ११.२१ ॥

भगवत्समीपमुपयातवतां प्रमदो न केवलमलब्धतुलः ।
अपि तस्य लोकमतिलोकगुणं भजतां सुदुर्लभमभूरिशुभैः ॥ ११.२२ ॥

न भवंति यत्र मृतिजन्मजराः त्रिविधं भयं किमुत दुःखगणः ।
अपरं च किंचिदशुभं न भवेत् न गुणादि तत्प्रभवमूलमपि ॥ ११.२३ ॥

अनुभूयते सुखमनंतसखैः सकलैरलंमतिपदं सततम् ।
अपि तारतम्यसहितैः स्वगुरुप्रवणैः परस्परमुरुप्रणयैः ॥ ११.२४ ॥

अतिसुंदराः सुरभयः पुरुषाः हरिचंदनेन नवचंद्ररुचा ।
चलचारुचामरधरानुचरा विचरंति नित्यतरुणा इह ते ॥ ११.२५ ॥

सविलासलास्यपरितुष्टदृशो मृदुगीतवाद्यमुदितश्रवणाः ।
अनुरंजयंति नवकंजदृशो रमणा अमी स्वरमणीस्तरुणीः ॥ ११.२६ ॥

परिणायकानुपवनाभिमुखान् अनु निस्सरंति हरिणीनयनाः ।
विमलाद् विमानवलयाच्छनकैः शशिमंडलादिव रुचो रुचिराः ॥ ११.२७ ॥

अरुणाश्मवर्णतनवस्तनवः शुभहारसन्निभरुचोऽप्यपराः ।
हरिनीलनीलरुचयोऽत्रपराः प्रकटीभवंति विविधाभरणाः ॥ ११.२८ ॥

सुचिरद्युतीर्दधति सूक्ष्मतरं स्वयमंबरं च खलु बिभ्रति याः ।
शुकनिःस्वना ध्रुवमिमा अपराः सुपयोधरा जलधरावलयः ॥ ११.२९ ॥

समतीतविद्रुमभुवां सुदृशां पदपल्लवाग्र्यनखरक्तरुचीः ।

परभागतः स्फटिककुट्टिमभूः प्रकटीकरोति न पुरा प्रकटाः ॥ ११.३० ॥

हरिणीदृशां निवसनानि बृहत्सुनितंबबिंबरुचिरोरुरुचा ।
शबळद्युतीनि मदनस्य जगज्जयवैजयंत्य इति निश्चिनुमः ॥ ११.३१ ॥

करपल्लवैस्तरळितैर्ललितैः असकृत् क्वणत्कनककंकणकैः ।
नवरोमराजिवलिवल्गुमृदुप्रतनूदरैरतिमनाक् तरळैः ॥ ११.३२ ॥

कुचकुंभपूर्णतरकांतिसुधारसशेषबिंदुविसरच्छविभिः ।
वरहारराजिभिरुतानुपदं परिलोठिताभिरशनैरुरसि ॥ ११.३३ ॥

अपि लीलया कुवलयोल्लसितैः अपरैः करैः सहचरीनिहितैः ।
वदनैः शुचिस्मितकटाक्षरसैः चलकुंडलोल्लसितगंडयुगैः ॥ ११.३४ ॥

प्रगतासु तासु रणितै रशनामणिनूपुरैरिव पुरा गदिताः ।
अनुवीक्षितुं तनुविलासमिमं तरुणा भवंत्यथ निवृत्तमुखाः ॥ ११.३५ ॥

अनुपालिताः स्वदयितैर्दयिताः कथमप्युपेत्य कुचभारनताः ।
शनकैः पुनस्तदवलंबबलात् किल ता विशंति परमोपवनम् ॥ ११.३६ ॥

हसितप्रसूननिकरोरुभरप्रणमत्सुवर्णमणिसर्वतरून् ।
उपगूहयन्नमृतसिंधुसखः पवनो न कस्य सुखमेधयति ॥ ११.३७ ॥

वरपारिभद्रकसुकल्पतरुव्रजपारिजातहरिचंदनवत् ।
सहितं समादिपदताननगैः परिभूषयंति तदहो ऋतवः ॥ ११.३८ ॥

स्मितमाधवीकुसुमरम्यतरौ नवचंपकादिकुसुमोल्लसितौ ।
मधुमाधवौ मधुपगीर्मधुरौ मधुजित्प्रियान् प्रमदमानयतः ॥ ११.३९ ॥

नवमल्लिकास्रजमभीष्टतमः शुचिसंभवां प्रणयिनीशिरसि ।
कलयन् स्वयं न कुशलेति किल प्रतिघट्टयत्युरुकुचावुरसा ॥ ११.४० ॥

मधुरस्वरास्ततपतत्रततिप्रकटांतपंक्तिधृतनेत्ररुचः ।
शिखिनोऽनुयांति हि सहस्रदृशं जलदर्तु लक्ष्मनिजनृत्तमहे ॥ ११.४१ ॥

शरदोल्लसत्कुवलयेक्षणया विकचारविंदरुचिराननया ।
प्रियया च शोभनशुकस्वनया रमते जनो मुखर हंसकया ॥ ११.४२ ॥

अभिनंदयन् हिमऋतुं सुसखा स्फटिकाचलच्छलहिमाधिकृतम् ।
फलिनीकुलं कुसुमयन् शिशिरो हसतीव फुल्लनवकुंदरुचा ॥ ११.४३ ॥

हिमशीतवर्षपरितापपुरस्सरदोषमूलमिह नर्तुगुणः ।
प्रियमेव साधयति नित्यमहो स विमुक्तिमानिति विमुक्तिमताम् ॥ ११.४४ ॥

अमृतस्रगुत्तमफलप्रसवान् अमृताय तत्र जनताऽर्पयति ।
उपभोक्तुमप्यविधिबंधवशा प्रकृतिं प्रयाति सकलोऽपि सदा ॥ ११.४५ ॥

प्रमदातिरेकमुपयातवता प्रमदागणेन चरतोपवने ।
उपगीयते स्म मधुरं मधुजिच्चरितं सकांतततिना सततम् ॥ ११.४६ ॥

ललना ललंत्यभिवरं प्रवरा लळिता लुनंति कुसुमानि पराः ।
इतराः स्रजो विरचयंति पतीन् अनुरंजयंति न हि काश्चन नो ॥ ११.४७ ॥

वनलीलया विविधया मुदिताः तरुणा घनस्तननतास्तरुणीः ।
सुलतालयेषु परिरभ्य रतिं वदनारविंदमधुपा दधति ॥ ११.४८ ॥

रसिकाः सुधाप्सु सरसीषु ततो रुतनूपुरानुकृतसारसिकाः ।
विहरंति साकमवगाह्य धवैः जलमड्डुकोत्सवहसद्वदनाः ॥ ११.४९ ॥

विविधा विधाय विहृतीः सलिले विकटेषु विद्रुमतटेषु गताः ।
सुरभिं सुवर्णमथ वर्णकमाददते सखीकरगतं महिळाः ॥ ११.५० ॥

जघनांशुकैरवयवाभरणैः कुचकुंकुमैश्च कचमाल्यवरैः ।
नयनांजनैरपि मिथोऽब्जदृशां घटितैरलंकृतिरलं क्रियते ॥ ११.५१ ॥

तनुमध्यमा निजगृहाणि गताः सममात्मनामसुसमैरसमैः ।
अमृतं पिबंत्यसुलभं भविभिः चषकैर्महारजतरत्नमयैः ॥ ११.५२ ॥

मृदुकम्रशय्यमनुरागवतां मणिमंचमंचितदृशोऽवसरे ।
अपि चोदिता अधिरुहंति शनैः विनयो हि भूषयति सर्वरसम् ॥ ११.५३ ॥

अभिकांतमुन्नमितकांतकुचा किल बध्नती सकुसुमां कबरीम् ।
सुमुखी सुलक्ष्यभुजमूलवलिः परिरभ्यते प्रणयिनाऽतिरसात् ॥ ११.५४ ॥

पृथुवृत्ततुंगकठिनोरसिजद्वयवारितायतनिजांतरयोः ।
भुजयोर्युगेन रमणो रमणीं परिरभ्य कोऽत्र रमयेन्न सुखी ॥ ११.५५ ॥

स्मितफुल्लमुल्लसितझिल्लिलसन्मणिकुंडलं मृदुकटाक्षपटु ।
निभृतो निरीक्ष्य सुचिरं सुतनोः प्रतिचुंबति प्रियतमो वदनम् ॥ ११.५६ ॥

नतमुन्नमय्य मुखचंद्रमसं परिरंभसंभृतमुदा सुदृशः ।
उपरम्यते न तरुणेन चिरं मधुराधरामृतरसं पिबता ॥ ११.५७ ॥

रभसावपातितपृथूरसिजः परिरभ्य तत्क्षणवियाततरः ।
मणितादिसौरतवितानपटू रमयत्यमून् युवतिसंघ उत ॥ ११.५८ ॥

अतिलौकिकान् रमयतो रमणान् रमयंत्यलौकिकगुणा ललनाः ।
अनुरूपरूपमतिलोकसुखं तदलौकिकं निधुवनं लसति ॥ ११.५९ ॥

न रतिः श्रमादिखचिता नियमाद् विरहव्यथाऽपि न वधूवरयोः ।
प्रतिकामिनीप्रणयतः कलहो न समस्ति दोषरहिते हि पदे ॥ ११.६० ॥

सुखसंविदात्मकतया वपुषां सुरभित्वमेव बहिरंतरपि ।

हरिधाम्नि दंपतिगणस्य ततो ननु मान्यतेऽपि मुनिभिः सुरतम् ॥ ११.६१ ॥

श‍ृणुताप्यलोकविषयं विषयं सकलस्य मुक्तनिकरस्य दृशाम् ।
वपुरिंदिरापतिरमंदरसं ननु सुंदरं प्रकटयत्यनिशम् ॥ ११.६२ ॥

मणिराजिराजित महामकुटं शितिकांतकुंतळसहस्रतयम् ।
अळिकार्धचंद्रविलसत्तिलकं श्रवणोल्लसन्मकरकुंडलयुक् ॥ ११.६३ ॥

परिपूर्णचंद्रपरिहासिमुखं जलजायताक्षमरुणोष्ठपुटम् ।
हसितावलोकललितैरतुलैः अभिनंदयत् प्रणतमात्मजनम् ॥ ११.६४ ॥

नवकंबुकंठमहिमांशुमहो महिमोपलेंद्रवरहारधरम् ।
रमणीयरत्नगणविद्धलसद्वलयांगुलीयकवरांगदवत् ॥ ११.६५ ॥

रविचक्ररुक्प्रकरचक्रकरं विधुबिंबकंबु मधुरांबुरुहम् ।
ज्वलनज्वलद्गदमुदारधनुः पृथुवृत्तहस्तमतिताम्रतळम् ॥ ११.६६ ॥

वरपीवरांसमधिराजदुरोमणिमंटपाग्र्यविलसत्कमलम् ।
सजगद्द्विसप्तकतनूदरकं शुभनाभिकंजगतकाळिनुतम् ॥ ११.६७ ॥

अतिकांतकांचिपदकांचिमिलत्तपनीयभंगरुचिपिंगपटम् ।
वरहस्तिहस्तसदृशोरुयुगं क्रमवृत्तचारुतरजंघमुत ॥ ११.६८ ॥

वरनूपुरं परमरुक्प्रपदं नवविद्रुमद्युतिनखावलिमत् ।
अरिवारिजध्वजकळंकलसत्पदपांसुपावितजगत्त्रितयम् ॥ ११.६९ ॥

निखिलागमावगमितैरमितैः सुखसंविदादिभिरनंतगुणैः ।
प्रपदादिकांतसकलावयवाकृतिभिः सदैक्यवददोषलवम् ॥ ११.७० ॥

अधिकारिणां गुणविशेषवषाद् द्विपदाद्यनंतचरणांततया ।
अतिभासितं घनगुणापघनैः इतरैष्च तत्तदुचितै रुचितैः ॥ ११.७१ ॥

नवभानुभाः कनककांतिपरं वरहारहारि हरिनीलहरित् ।
शबळप्रभादिविविधद्युतिमत् सुखबोधसौरभसुरूपगुणम् ॥ ११.७४ ॥

आष्चर्यरत्नेश् वधिकं जगत्त्रयेप्याष्चर्यमाष्चर्यमहो मुहुर्मुहुः ।
सौंदर्यसारैकरसं रमापतेः रूपं तदानंदयतीह मोक्षिणः ॥ ११.७३ ॥

इज्यते यज्ञशीलैः स यज्ञः प्राज्ञमध्ये परः प्रोच्यतेऽन्यैः ।
गीयते गेयकीर्तिः सुगीतैः विध्यबद्धैः सदाऽऽनंदसांद्रैः ॥ ११.७४ ॥

वैकुंठे ते श्रीविशेषा जनानामत्याश्चर्यं चित्तवाचामभूमिः ।
वैकुंठेते श्रीविशेषाजनानामुक्तश्लाघ्ये युक्तमेतादृशत्वम् ॥ ११.७५ ॥

यंयं सुखी कामयतेऽर्थमत्र संकल्पमात्रात् सकलोऽपि स स्यात् ।
इत्येव वेदा अपि वेदयंति मुक्तिं ततः को विभवातिरेकः ॥ ११.७६ ॥

महानंदतीर्थस्य ये भाष्यभावं मनोवाग्भिरावर्तयंते स्वशक्त्या ।
सुराद्या नरांता मुकुंदप्रसादाद् इमं मोक्षमेते भजंते सदेति ॥ ११.७७ ॥

॥ इति श्रीमत्कविकुलतिलक त्रिविक्रमपंडिताचार्यसुत
श्रीनारायणपंडिताचार्यविरचिते श्रीमध्वविजये
आनंदांकिते ऐकादशः सर्गः ॥